No. २३५१ क

Title गुरुपादुकास्तवराजः

Author

Extent २ पत्र Age

Subject स्तोत्र

गुरुपादुकास्तवराजः

नं० ~~२१~~ १०३

२ पन्ने

पा. दु. २

ॐश्रीगुरुपादुकास्तवः ॐवागुरामूलवलयेसूत्राद्याःकवलीकृताः एवंकुला
गमेज्ञानेपादुकायत्रतिष्ठिते १ कोटिकोटिमहादानात्कोटिकोटिमहाव्रतात्
कोटिकोटिमहायज्ञात्पराश्रीपादुकास्मृतिः २ कोटिमंत्रजपात्कोटितीर्था
वगाहनात् कोटिदेवार्चनाद्देविपराश्रीपादुकास्मृतिः ३ महारोगेमहोत्पाते
महद्भुविमहत्तरभये महापदिमहापापेस्मर्तारक्षतिपादुका ४ तेनाधीतंश्रुतं
ज्ञातंदत्तमिष्टंचपूजितं जिह्वाग्रेवर्ततेयस्यपराश्रीपादुकाप्रिये ५ सकृत्श्री
पादुकांदेवियावज्जीवतिभक्तितः ससर्वपापरहितःप्राप्नोतिपरमांगतिं ६
शुचिर्वाप्यशुचिर्वापिभक्त्यास्मरतिपादुकां अनायासेनधर्मार्थकाममोक्षान्ल
भेतसः ७ श्रीनाथचरणांभोजंयस्यांदिशिविराजते तस्येदिशेनमस्कुर्यात्
भक्त्याप्रतिदिनंप्रिये ८ नपादुकापरोमंत्रोनदेवःश्रीगुरोःपरः नहिशैवात्परो

मार्गो न गुरुपंक्तिकुलपूजनात् ९ ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदं मंत्र
मूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा १० गुरुमूलाः क्रियाः सर्वा लोकेस्मिन्क
लनायिके तस्मात्सेव्यो गुरुर्नित्यं सिद्ध्यर्थं भक्तिसंयुतैः ११ तावदार्तिभयं दुः
खं शोकमोहभ्रमादयः यावन्नायाति सदने श्रीगुरुर्भक्तवत्सलः १२ इति श्री
रुद्रयामले गुरुपादुकास्तवराजः समाप्तः ॥